International Journal of Sanskrit Research 2023; 9(1): 239-242

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(1): 239-242
© 2023 IJSR
www.anantaajournal.com
Received: 02-01-2023
Accepted: 04-02-2023

**डॉ. धीरेन्द्र कुमार झा**
ग्राम+पत्रालय- सुगौना, भाया- राजनगर, जिला' मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ. धीरेन्द्र कुमार झा**
ग्राम+पत्रालय- सुगौना, भाया- राजनगर, जिला' मधुबनी, बिहार, भारत

# सत्यव्रतशास्त्रिणः काव्येषु सांस्कृतिकी राजनीतिकी राष्ट्रियचेतना चेति।

**डॉ. धीरेन्द्र कुमार झा**

**सारांश**
अस्य महोदयस्य संस्कृतपद्यमयं पत्राणां सङ्कलनं 1994 तमे वर्षे पत्रकाव्यमिति नाम्ना प्राकाश्यमभजत। द्वादशवर्षान्तरं नानापत्राणि शास्त्रिणा स्वबन्धुभ्यः प्रेषितानि। तान्यपि प्राकाश्यं भजेरन्निति धिया संकलनं पत्रकाव्यस्य द्वितीयभागरूपेण प्रकाशितम्। एतेषु पत्रेषु कुशलपरिप्रश्नाद्यतिरेकेण नाना शास्त्रीयाः विषया परामृष्टाः ये विदुषां विनोदाय कल्पेरन्। मध्ये मध्ये व्याकरणदृष्ट्या अर्थदृष्ट्या वा केचन विशिष्टाः प्रयोगाः समाश्रिताः तद्व्याख्यानाय तत्र तत्र टिप्पणयो ऽपि समायोजिताः सूत्रवार्तिकाद्युद्धरणपुरःसरं कोषाप्तवाक्याद्युद्धरणपुरस्सरं च।

**कूटशब्द :** प्रयोगाः, समाश्रिताः, तद्व्याख्यानाय

## प्रस्तावना

पत्रकाव्यस्य द्वितीयभागः सरस्वतीप्रार्थनया आरभ्यते। तत्रारम्भश्लोकः एवं विद्यते। शुक्लाम्बरधरां शुक्लां वीणापुस्तक-धारिणीम्। काव्ये ऽस्मिन् विविधरचयितृणां ग्रन्थानां परिचयः पर्वदिनशुभाशंसनानि, ग्रन्थानां पुरोवाक्, विविधपण्डितानां पत्राणाम् उत्तराणि, मित्राणां पत्राणां कृते दत्तानि प्रत्युत्तराणि, शिष्याणां कृते शुभाशिषः, स्वीयकार्यक्रमाः, स्वीयमनोभावाः इत्यादिविषयाः सन्ति। काव्ये ऽस्मिन् सप्तत्रिंशदधिकप्रकाशितानि पत्राणि शास्त्रिणा प्रेषितानि नव पत्राणि शास्त्रिणे प्रत्युत्तररूपेण अन्यैः प्रेषितानि सन्ति। आहत्य षट्चत्वारिंशदधिक एकशतं पत्राणि सन्ति।

काव्ये ऽस्मिन् प्रयुक्तानि छन्दांसि– 1 अनुष्टुप, आर्या, इन्द्रवज्रजा, उपजातिः, उपेन्द्रवज्रा, द्रुतविलम्बितम्, भुजङ्गप्रयातम्, मालिनी, वसन्ततिलका, वंशस्थम्, वियोगिनी, वैतालीयम्, शार्दूलविक्रीडितम्। उपमाद्यलङ्काराः प्रसादादिगुणाः सन्दर्भानुसारं दृश्यन्ते अत्र। अस्य शास्त्रिणः विषये विदुषां कीदृशी गौरवभावना विद्यते इति विषये श्लोकोऽयं उदाहरणभूतः भवत्येव–

दिग्भ्यो विदिग्भ्यः समुपेयिवांसः
सन्तो भवन्तः प्रतिभानवन्तः।
प्राचामपाचां विदुषां सुवाचाम्
आचामकाः प्राग्रहराः जयन्ति।।

विपश्चितां दर्शनेन अस्य कवेः शास्त्रिणः मनः कथं भवति इत्यस्मिन् विषये श्लोकोऽयम् उदाहर्तुं शक्यते–

विपश्चितामत्र समागमेन
हर्षप्रकर्षो हृदि नो न माति।
इन्दोः कराणां प्रसरेण विष्वक्
स्यादुत्सवः कैरवकाननस्य।।

पत्रिकाणां सञ्चालने महान् क्लेशः इति तत्रापि संस्कृत- पत्रिकाणां सञ्चालने अवस्था कीदृशी इति श्लोकोऽयं दृष्टान्तरूपेण दृश्यते–

सञ्चालने संस्कृतपत्रिकाणाम्
असंशयं कष्टपरम्परैव।

सोढ्वापि तां तत्र कृताभियोगा
धन्या भवन्तो जगतीतले ऽत्र॥

अत्र पण्डितानां पत्रिकासञ्चालकानां धन्यत्वं प्रतिपादितम्।
14-1-1995 दिने दिल्लीस्थान् श्री मदनलालकुमारिया महाभगान् प्रति प्रेषिते पत्रे भ्रातृस्नेहविषये एवमवोचदयं शास्त्रिमहाभागः। "सर्वं लभ्यते जगति जनेन सुखमैहिकम्। स्वत एव समुद्भूतो भ्रातृस्नेहस्तु दुर्लभः।"

अमीरचन्द्रशास्त्रिणः प्रति प्रेषिते पत्रे एवं वदति। तव पत्रमवाप्य मम हर्षस्य अवधिः नास्ति इति उपमालङ्करेण सम्यक् उपजातिवृत्ते अवोचदयं वैदुष्यपूरिपूर्णो ऽयं कविः शास्त्रिमहोदयः—

अवाप्य पत्रं भवतां चिराय
स्नेहातिसंसर्गनिसर्गरम्यम्।
अम्भोनिधावम्म इवेन्दुपादैः
हर्षप्रकर्षो हृदि मे न माति॥

इति दुर्गादत्तशास्त्रिमहाभागान् प्रेषिते पत्रे सहजस्नेहमधिकृत्य एवमवादीदयं कविवरेण्यः—

सहजो भवतां स्नेहो यो मय्यस्ति विदां वराः।
अभिभूतो ऽस्मि तेनेति न वाक् प्रसरतीह मे॥

09-01-1996 दिने दरभंगस्थान् जयमन्तमिश्रमहाभागान् प्रति प्रेषिते तत्रे तस्य महाभागस्य व्यक्तित्वमधिकृत्य श्लोकोऽयं विरचितः ज्ञानपीठबिरुदाचितैः शास्त्रिमहोदयैः—

निरन्तरं शास्त्रचये कृतश्रमा
विलक्षणप्रौढिविभूषिता बुधाः।
दिगन्तविश्रान्तयशो विलासिनो
भवादृशाः सन्ति न भूरि भूतले॥ [27]

18-6-1996 दिने थाईदेशमहाराजकुमारीं प्रति तत्पितुः महाराजस्य काञ्चनाभिषेकमभिलक्ष्य प्रेषितेषु पद्येषु एकस्मिन् पद्ये तत्सौजन्यमधिकृत्य एवम् अवदत् कविः—

पितेव यं पश्यति सर्वलोकः
सर्वात्मना स्निह्यति चापि तस्मै।
बद्धादरस्तं प्रति देववच्च
शुभं सदा प्रार्थयते च तस्य॥

02-12-1997 दिने फरीदाबादस्य डा. बदरीनाथकल्ला महोदयं प्रति प्रेषिते पत्रे कश्मीरदेशस्य शान्तिमिच्छन् कविरयं श्लोकममुं वदति –

शान्तिः प्रवर्ततां भूयो हिंसा चापि निवर्तताम्।
इत्येव प्रार्थ्यते नित्यं शङ्करो लोकशङ्करः॥ [34]

13-02-1998 दिने (नलेटी) कांगडास्थदुर्गादत्तशास्त्रिणं प्रति प्रेषिते पत्रे एवं वदति त्वया प्रेषिते काव्यकुञ्ज रसगर्भरम्याः विषयाः, पद्यानि च सन्ति तानि यानि मम हृदयं स्पृशन्ति इति। 41/4
न सन्ति मन्ये बहवोऽत्र लोके
प्रौढिर्भवेद्यत्कृतिषु प्रभूता।
हृद्यानवद्यानि भवत्कृतानि
पद्यानि सत्यं हृदयं स्पृशन्ति॥

02-7-1999 दिने मिथिलेशकुमारीं पाटलिपुत्रस्थां प्रति तत्कृतिं सुभाषचन्द्रचरितमभिलक्ष्य प्रेषितेषु शुभाशंसनपद्येषु, सदाशयानां कीर्तने ज्ञानं, पुण्यभरः, सदा सुखम् आनन्दश्च भवत इति श्लोकोऽयं प्रतिपादयति।

सदाशयानां चरितानुकीर्तनात्
सदा सदानन्दभरो विभाति।
ज्ञानं च तत् पुण्यभरं सुखं च
तनोति कीर्तिं भुवि चाप्यनन्ताम्॥

सः सुभाषचन्द्रः न कदाचित् विस्मरणीयः भारतीयैः जनैः, यः परतन्त्रतायाः पाशात् स्वकीयं देशं मोचयितुं प्रयत्नम् अकरोत्। स्वबलेन देशं स्वतन्त्रम् अकरोत्।
31-01-2001 दिने दिल्लीस्थान् कृष्णलालमहाभागान् प्रति प्रेषिते पत्रे किम्प्रभुतामधिकृत्य श्लोकोऽयं ग्रथितः शास्त्रिवर्येण—

हितान्न यः संश्रुणुते स किंप्रभुः
तृतीयोऽध्यायः
इत्यस्ति शुद्धा कविभारवेर्गीः।
सर्वत्र भोः किंप्रभुतैव लोके
दुःखाकरा दृष्टिपथं प्रयाति॥ 80-23

नलेटीस्थ श्रीदुर्गादत्तशास्त्रिणः प्रति प्रेषिते पत्रे वृद्धानधिकृत्य एवं वदति सः—

ज्ञानेन वृद्धान् वयसा च वृद्धान्
धर्मेण वृद्धान् तपसा च वृद्धान्।
प्रणम्य श्रद्धाभरितान्तरात्मा
सत्यव्रतो ऽहं विरमामि वाचः॥ 107/4

श्लोके ऽस्मिन् ज्ञानवृद्धाः, वयोवृद्धाः, धर्मवृद्धाः, तपोवृद्धाश्च नित्यं वन्दनीया इति उपदिशति।
अस्य शिष्याः विविधदेशेषु विविधविश्वविद्यालयेषु छात्रान् अध्यापयन्ति। तान् दृष्ट्वा अस्य कवेः मनःस्थितिः, मनोभावाः च एवं वर्तन्ते—

आचार्यपीठमधिरूढवतो निरीक्ष्य
तान् मे प्रनृत्यति मदेन मनोमयूरः।
शिष्यप्रकर्षवशतो ऽविदुषोऽपि तावत्
कीर्तिर्गुरोर्लसति दिक्षु विदिक्षु चापि॥

शिष्योन्नतपदेन गुरोः कीर्तिरपि दिक्षु विदिक्षु च लसति इति ज्ञायते। अत्र शिष्यादिच्छेत् पराजयं भावनापि अस्य कवेः अस्ति इति ज्ञायते।
26-11-2001 दिने प्रेषिते पत्रे देशे संस्कृतभाषायाः उन्नतिः अवश्यं भविष्यति इति श्लोकोऽयं वदति—

देशे भवेच्चात्र पुनः प्रचारो
वाचः सुराणां सुरलोककाम्ये।
इत्येव सम्प्रार्थ्य प्रभुं महेशं
वाचं स्वकीयमुपसंहरामि॥ 93/6

अत्र एकस्मिन् पत्रे संस्कृतपण्डितानां संख्या क्रमात् न्यूना भवति। तन्मनसि कृत्वा शास्त्रिमहोदयः स्वाभिप्रायम् एवं प्रकटयति श्लोके ऽस्मिन्–

विद्वद्वराणां खलु तद्विधानां
संख्या क्रमाद्यत् ह्रसिमानमेति।
विद्यते तेन ममान्तरङ्ग
भविष्यचिन्ताकवलीकृतस्य।।

अत्रैव अन्यस्मिन् श्लोके ज्ञानार्जनं केवलं जीविकार्यै एव भवति न तु तत्त्वावबोधाय। विद्यार्थिनः अपि दीर्घदृष्टयः न भवन्ति इति श्लोकोऽयं उदाह्रियते–

ज्ञानार्जनं केवलजीविकार्यै
तत्त्वावबोधाय तदस्ति नैव।
विद्यार्थिनो ह्यद्यतना विमूढा
न दीर्घदृष्टिं कलयन्ति हन्त।।

ग्रन्थालयेषु ग्रन्थाः नष्टाः भवन्ति। अधुना छात्राः ग्रन्थालयं न गच्छन्ति, तत्र पुस्तकानि नावलोकयन्ति इति अस्मिन् श्लोके उदाहरति–

संहस्रशो वाप्यर्थ लक्षशोऽत्र
ग्रन्था विनष्ट अथ नाशिता वा।
विद्यार्थिभिः सन्ति तथाऽप्यनेके
ग्रन्थालयौघेषु सुरक्ष्यमाणाः।।

यो श्रमेण शास्त्राणि अधीत्य, इतरान् नाध्यापयति तस्य जीवितं निष्फलमिति वदति अयं महान् कविः–

अधीतविद्योऽस्मि गुरोः सकाशात्
श्रमेण शास्त्राणि मया श्रुतानि।
स्वजीवितं निष्फलमेव मंस्ये
नाध्यापयेयं यदि तानि कञ्चित्।।

आधुनिककाले संस्कृतच्छात्राः शास्त्राणि केवलं परीक्षोत्तीर्णता- मधिकृत्य पठन्ति, तदेवैतेषां लक्ष्यम् इति श्लोकोऽयं बोधयति–

परन्तु शास्त्रेषु रुचिं बिभर्ति
न कोऽपि शिष्यो ऽप्यनुशासितो ऽद्य।
उत्तीर्णतां वाञ्छति केवलं स
तत्तत्परीक्षासु तदस्य लक्ष्यम्।।

पाठ्यक्रमे ये ग्रन्थाः पाठ्यांशरूपेण सन्ति, तान् एवं ग्रन्थान् पठन्ति, न स्पृशन्त्यन्यान् इति वदन् छात्राणां स्थितिं तेषां अध्ययनश्चाधिकृत्य इमे श्लोकाः साक्षिभूताः भवन्ति-

सर्गाः कियन्तो रघुवंशकाव्ये
ज्ञातुं न तेषां रुचिरस्ति कापि।
परीष्टिनिर्धारितसर्ग एव
तेषां प्रवृत्तिर्विषयान्तरे नो।।
न कालिदासस्य गिरां रहस्यं
न भारवेर्वा पुनरर्थतत्त्वम्।
माघस्य नो वा विशदान् गुणांस्त्रीन्
बोद्धुं हि ते यत्नपरा भवन्ति।। 2/16

महोदयोऽयम् क्षणशः कणशश्चैव विद्यामर्थ च साधयेत् इति सूक्तिम् समाश्रित्य स्वजीवितम् यापयति।
भारतराष्ट्रस्य विशालमैतिहासिकश्च स्वरूपं बृहत्तरभारते ऽस्मिन् कविः सोत्साहं विशदीकरोति। भारतराष्ट्रस्य प्रसिद्धं प्रकृष्टं च स्वरूपं विस्मृत्य पाश्चात्यभावदासाः केचन भारतीयाः स्वाभिमानरहितास्सआताः। तेभ्यस्सर्वेभ्यः भारतीयेभ्यः वास्तविकं प्रतिष्ठात्मकं ज्ञानं प्रददाति काव्यमिदम्। भारते नास्ति किमपि महत्त्वपूर्णमिति भावयतां भारतीयानां नयनविकासं करोतीदं काव्यं बृहत्तरं भारतम्।
बहुप्राचीने एव काले भारतीयाः स्वदेशात् प्रस्थिता भूत्वा बहुषु द्वीपेषु प्राविशन्। अन्येऽपि स्वस्वसाम्राज्यवृद्धिमिच्छन्तः शासकाः अन्येषु द्वीपेषु प्राविशन्। एवमन्यद्वीपेषु प्रविष्टाः भारतशासकाः विजिगीषवस्सन्त एव तत्र प्रविष्टाः। एतेषां लक्ष्यं विजय एव आसीत्। परन्तु तं विजयं ते शस्त्रेण, युद्धेन, सेनया विनैव साधितवन्तः। कीदृशः विचित्रः विजयः एषः।[1]
प्रचुरमेधासम्पन्नाः काव्यकर्तारः सत्यव्रताः अपि स्वजीवने शान्तिकामुकाः। अतो दुष्टेष्वपि ते कृपामेव प्रादर्शयन्। प्राचीन भारतीयानां शान्तिप्रियत्वं ते सुविशदं वर्णयन्ति। तेषां कथनानुसारेण भारतीयाः शान्तस्वभावाः कदापि रक्तपातं नेच्छन्ति[2] सततशान्तिचित्ताः भारतीयाः परधनापहरणकामनाविरताः। सर्वदा शास्त्राभ्यासधुरीणाः, विविधकलाचुञ्चवः स्वीयस्य धार्मिकजीवनस्य प्रचारं, प्रसारं च ते कृतवन्तः।
भारताद् बहिरन्येषु देशेषु प्रविष्टै प्राचीनभारतीयैः किमपि महत्त्वपूर्णं प्रयोजनं विचिन्तितं स्यात्। भारतीयधर्मप्रचारं तु ते कृतवन्त एव, परन्तु केवलं धर्मप्रचारार्थं ते गतवन्तः किम् इति विविधैः मनीषिभिः विविधप्रकारैः चिन्तनं कृतम्। वस्तुतः ते सर्वे ऽपि मनोःवाक्यं सर्वथा विस्मृतवन्त इति प्रतिभाति। तथाहि मनुना निगदितम्-

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।। इति।
कविना शास्त्रिवर्येणापि इदमेव कारणं प्रदर्शितम्।
स्वं स्वं चरित्रं भुवि भूमिदेवाः प्रशिक्षयन्तः किल सर्वपुंसः।
पुरा प्रयाता इहदेशजाता यवादिदेशान् दिशि दक्षिणस्याम्।।[3]

वस्तुतः अन्यदपि-एकं ऐतिहासिकं कारणं जगद्विदितं वरीवर्ति। क्रीस्तोः प्राक् षष्ठे शतके तथागतेन यः धर्मप्रचारः कृतः तेन समग्रमपि भारतवर्षं भृशं प्रभावितमासीत्। भगवतो बृद्धस्य परिनिवाणानन्तरं बुद्धशिष्याः बुद्धोपदेशान् विविधेषु सम्मेलनेषु समादृतवन्तः। परन्तु क्रिस्तोः प्राक् तृतीये शतके पाटलीपुत्रे सम्राजः अशोकस्य आध्यक्ष्ये या तृतीया बौद्धसङ्गीतिस्समायोजिता, तस्यां भारताद् बहिः समीपवर्तिषु विभिन्नेषु द्वीपेषु बुद्धशिष्याः धर्मप्रचारकाः प्रेषिताः। ते सर्वे ऽपि बुद्धोपदेशनिष्णाताः, धर्मप्रचार- धुरंधराश्च। यद्यप्येते सिंहल-यव-बाल्यादिषु द्वीपेषु प्राविशन् तथाप्येतेषां सर्वेषां वचनेषु तथागतधर्मोपदेशसाम्यमासीत्। विषय-मेनमैतिहासिकं कविरित्थं प्रतिपादयति–

तथा नियुक्ताः प्रियदर्शिना प्राक् सम्राडशोकेन सहस्रशो ये।
शाक्यस्य सन्देशहरा मुनेस्ते द्वीपान् यवादीन् मुदिताः प्रयाताः।।[4]

तदर्थमेव तेषु देशेषु अत्यन्तविशालमन्दिराणि तैर्विनिर्मितानि। मन्दिरेषु प्राचीनैतिहासिकतथ्यमुपदिशद्भिः शिलालेखैः उपर्युक्ताः बहवः विषयाः स्पष्टाः भवन्ति। एते शिलालेखाः संस्कृतोपनिबद्धाः, प्राचीन-भारतीय संस्कृतिप्रतिपादकाः च। सत्यव्रत शास्त्रिमहाभागैः अपि एते देशाः प्रविष्टा तत्र च संस्कृतमयशिलालेखाः तैः दृष्टाः परिष्कृताश्च। तेषु मन्दिरेषु भारतीयकलाद्योतकानि बहूनि शिल्पानि विनिर्मितानि। अत्रत्याः एव नृत्यपद्धतयः तत्र प्रदर्शिताः। इन्डोनेशिया देशस्य बालिप्रमुखेषु द्वीपेषु न केवलं बौद्धधर्मप्रचारः, अपि तु रामायणादिभारतीयानि

काव्यानि अपि प्रसिद्धानि। विशेषतो रामायणस्य तत्र प्रसिद्धिः। सम्प्रत्यपि तेषु द्वीपेषु रामायणी कथा प्रसिद्धा। सर्वे जनास्तत्रत्याः रामायर्णी कथां जानन्ति। तेषां समग्रा संस्कृति रामायणेन प्रभाविता। न केवलं रामायणी कथा, संस्कृतस्यापि महान् शब्दराशिः तत्र प्रविष्टः। पुरा संस्कृतभाषायाः तत्र महानादरः आसीत्। परन्तु गच्छता कालेन यथा भारते बद्व्यः आधुनिक- भारतीयभाषाः समुद्भूताः, तथा बाल्यादिद्वीपेष्वपि तत्रस्थाः भाषाः संस्कृतेन प्रभवितास्सत्यः प्रादुर्भूताः। संस्कृतस्यानन्तशब्द- राशिः तत्र प्रविष्टः। सम्प्रत्यपि संस्कृतानभिज्ञैः कदाचित्स नावगम्यते।

वस्तुतः संस्कृतशब्दा एव ईषत् ध्वनिपरिवर्तनेन तत्र प्रयुज्यन्ते इति ग्रन्थकृता प्रतिपवितम्। [5]

**संदर्भ**


1. विना युद्धं विना शस्त्रं विना सेनाश्च भीषणाः। विना नीतिं पुरा द्वीपा भारतीयैर्विनिर्जिताः।। बृ॰भा॰ 12
2. किं मुधा रक्तपातेन किं वा नो भूमिकाम्यया। इत्येवं धर्मजिष्णुत्वं कामयाचक्रिरे हि ते।। बृ॰भा॰ 13
3. बृ॰मा॰ II 23
4. बृ॰भा॰ II 24-25
5. बृ॰भा॰ 31।